SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

# राष्ट्रियशिक्षानीति-परिपेक्ष्ये शिक्षकस्य भूमिका (संस्कृतभाषाशिक्षणस्य विशेषसन्दर्भे)

डॉ. दिव्या देशपांडे

**शोधसार:**

व्यक्तित्वस्य विकासाय भाषाकौशलमावश्यकम् । उत्तमा स्पष्टा च भाषा उत्तमव्यक्तित्वस्य प्रतीका भवति । एवं सर्वं विचिन्त्येव राष्ट्रियशिक्षानीतौ 2020 भारतीयभाषाशिक्षणस्य महत्त्वं प्रतिपादितमस्ति । अत: एषा शिक्षानीति: बहुभाषितायाः प्रोत्साहनाय, त्रिभाषिकनियमस्य क्रियान्वयनाय बद्धपरिकरास्ति । भारतीयभाषाणां शिक्षणेषु संस्कृतभाषाशिक्षणं महत्वपूर्णम् । संस्कृतभाषाशिक्षणस्य विषयेऽपि राष्ट्रियशिक्षानीतौ प्रावधानानि सन्ति । राष्ट्रियशिक्षानीते: अनेके सिद्धान्ता: संस्कृतभाषाशिक्षणे एवं साहित्यशिक्षणे एव सम्मिलिता: सन्ति । अत: राष्ट्रियशिक्षानीतौ संस्कृतशिक्षणस्य स्थानविशेषम् । संस्कृतसम्भाषणं, संस्कृते नवाचारा:, संस्कृते नूतनविषयान् अधिकृत्य शोधकार्यं, समसामायिकविषयेषु संस्कृतस्य प्रासङ्गिकता इत्यादीनि लक्ष्यानि स्वीकृत्य राष्ट्रियशिक्षानीति: 2020 अग्रेसरति ।

राष्ट्रियशिक्षानीत्यानुसारेण भाषाधिगमनाय छात्राणां चतुर्णां कौशलानां वर्धनम् आवश्यकमेव - श्रवणम्, भाषणम्, पठनम्, लेखनम् । संस्कृतशिक्षणस्य प्रथमं सोपानं विद्यार्थिषु श्रवणेच्छाया: जागरणमस्ति । विद्यार्थिषु श्रवणकुतूहलस्य निर्माणाय श्राव्यमाना: विषया: रुचिकरा: भवेयु: । क्रीडामाध्यमेनापि श्रवणाभ्यास: भवितुं शक्यते । सप्ताहे एकवारं शिक्षक: सद्यस्क:(डिजिटल)कार्यक्रमा: छात्रेभ्य: दर्शयेत् तथा च तेषाम् अर्थावबोध: अपि कारयेत् ।

भाषणकौशल - विकासाय सम्भाषणमेव उपायम् । प्रथमम् अभिनयमाध्यमेन सरलविधिना प्रत्यक्षपाठनपद्धत्या, कथाकथनेन, भाषाक्रीडया, चित्रप्रदर्शनेन, वस्तुप्रदर्शन्या तथा च एतादृशीभि: अन्याभि: विधिभि: सम्भाषणं पाठनीयम् । संस्कृतशिक्षका: संस्कृतस्य संस्कृतमाध्यमेन एव पाठनं कुर्यु: ।

**डॉ. दिव्या देशपांडे**
सहायक-प्राध्यापिका(संस्कृतम्)
शासकीयः दू.श्री. वै. संस्कृत-महाविद्यालय:, रायपुरम्(छ.ग.)
Email - divyasanskrit9@gmail|com

वाक्यानां सुष्ठूच्चारणं तेषां अर्थावगतिः एव पठनक्रिया । पठनकौशल वर्धनाय आदर्शवाचनम्, अनुकरणवाचनं, मौनवाचनादिनि वाचनानि भवेयुः ।

संस्कृतलेखनकौशलवर्धनाय देवनागरी लिप्याः आवश्यकता । अतः शिक्षकैः लिपिशिक्षणविषये उपेक्षा न कर्तव्या । लघुवाक्यानां लेखनाभ्यासतः काव्यलेखनं यावत्, लेखनकौशलस्य वर्धनं शिक्षकस्य दायित्वमेवास्ति ।

संस्कृतं प्राचीनाभाषा किन्तु आधुनिकसन्दर्भे संस्कृतविषये शोधकार्याणि भवेयुः इति प्राध्यापकानां दायित्वम् । नवाचारं स्वीकृत्य शिक्षकाः पाठयेयुः । ते प्राचीनज्ञानस्य तथा च आधुनिकसमाजस्य समन्वयकाः भवेयुः । पुरातना पद्धतिः नूतनया सह मिलित्वा अग्रेसरेत् । संस्कृतं समाजस्य भाषा भवेत् । एतदेव लक्ष्यं स्वीकृत्य संस्कृतशिक्षकाः अग्रे गच्छेयुः । एतदेव अस्याः नीतेः लक्ष्यम् ।

**कूटशब्दाः -** राष्ट्रियशिक्षानीतिः, संस्कृतभाषा, संस्कृतशिक्षकः, श्रवणम्, भाषणम्, पठनम् , लेखनम्, संस्कृते शोधकार्यम्

**प्रस्तावना**

वाक् अभिव्यक्तेः सर्वश्रेष्ठं माध्यमम् । एषा मनुष्यस्य सा शक्तिः या मनुष्यमन्येषु प्राणिषु श्रेष्ठं करोति । ऋग्वेदस्य वाक् सूक्ते उद्धृतोऽस्ति-

**यं कामये तंतमुग्र कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।**[1]

अर्थात् अहं(वाक्)यस्य संरक्षणं कर्तुमिच्छामि, तं श्रेष्ठं करोमि । तं तं ब्रह्माणं(उच्चं), तमृषिं, तं सुष्ठुमेधावन्तं करोमि ।

वाक्यपदीये अपि उल्लिखितमस्ति-

**वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती ।**
**नः प्रकाशः प्रकाशते सा हि प्रत्यवमर्शिनी ॥**[2]

वस्तुतः वाक् स्वरूपमेव सर्वस्यापि ज्ञानस्य स्वरूपप्रकाशकम् । सा वाग्रूपता प्रकाशस्यापि प्रकाशिका अर्थात् वाग्रूपानुषङ्गेनैव ज्ञानं ज्ञानत्वेनाभिधीयते ।

**सा सर्वविद्याशिल्पानां कलानाञ्चोपबन्धनी ।**
**तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥**[3]

अर्थात् सा वाग्रूपता सर्वासां चतुर्दशविद्यानां सर्वेषां शिल्पानां कलानाञ्च बोधिका अस्ति । वाग्रूपतावशादेव सर्वमुत्पन्नं पदार्थजातं विभक्तं प्रतीयते ।

अथ च- शब्दरूपा दिव्यज्योतिरेव समस्तसंसारं दीप्यते।

**इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।**[4]

इत्थं स्पष्टमस्ति यत्,मनुष्यस्य सर्वाङ्गीण प्रगत्यै सा वाक्शक्तिः आवश्यकी। वाण्याः यादृच्छिकं स्वरूपमेव भाषा अर्थात् मुखोच्चारितानां वर्णानां, शब्दानां वाक्यानाञ्च समूहः भाषा। भाषा विचाराणाम् आदानप्रदानयोः साधनम्। सामाजिकजीवने मनुष्यस्य उत्तममानसिकस्वास्थ्याय विचारविनिमयस्यावश्यकता वर्तते। अतः कस्यापि समाजस्य संस्कृतेः विकासाय, तादात्म्याय, श्रेष्ठतायै च अन्यतत्वैः सह भाषायाः साहित्यस्य च योगदानमपि महत्त्वपूर्णमस्ति।

**राष्ट्रियशिक्षानीतौ भारतीयभाषाणां संवर्धनम्-**

व्यक्तित्वविकासस्य विविधपक्षेषु प्रमुख-पक्षः मनुष्यस्य भाषा कौशलस्य विकासोऽपि अस्ति। उत्तमा स्पष्टा च भाषा उत्तमव्यक्तित्वस्य प्रतीका भवति। एवं सर्वं विचिन्त्येव राष्ट्रियशिक्षानीतौ 2020 भारतीयभाषाशिक्षणस्य महत्त्वं प्रतिपादितमस्ति-

**भाषा निःसंदेहं कलया संस्कृत्या च अविच्छिन्नरूपेण संयुक्ता वर्तते। विभिन्नभाषाः विश्वं विभिन्नरूपेण दर्शयन्ति अतः मूलरूपेण कस्यापि भाषायाः वक्ता स्वानुभवान् कथमवगच्छति, कथं वा गृह्णाति, इदं सर्वं तस्याः भाषायाः संरचनाधारितं भवति। विशेषरूपेण भिन्नसंस्कृतेः जनः अन्यैः सह व्यवहारेण, परिवारसदस्यैः सह व्यवहारेण, आधिकारिकजनैः सह व्यवहारेण मित्रैः अपरिचितैः च सह व्यवहारेण च भाषा प्रभाविता भवति। एवं व्यवहारकाले संभाषणशैली अपि प्रभावं जनयति। एकया भाषया द्वयोः परस्परसंभाषणकाले वार्तालापस्य स्वरे मामकभावना या भवति सा संस्कृतेः प्रतिबिम्बम् अङ्कनं च विद्यते। सा संस्कृतिः अस्माकं भाषासु समाहिता विद्यते। साहित्यम्, नाटकानि, सङ्गीतं, चलचित्रम् इत्यादिकलाप्रकारकाणां पूर्णरूपेण प्रशंसनं भाषां विना न संभवति। संस्कृतेः संरक्षणाय संवर्धनाय प्रसाराय च अस्माभिः तस्याः संस्कृतेः भाषाणां संरक्षणं संवर्धनं च करणीयं भविष्यति।**[5]

भारतदेशे अनेकाः भाषाः सन्ति। किन्तु दौर्भाग्यवशात् तासां समुचित संरक्षणं नाभवत्,अतः अनेकाः भाषाः विलुप्तप्राया इति विचिन्त्येषा शिक्षानीतिः बहुभाषिकलायाः प्रोत्साहनाय त्रिभाषिकनियमस्य क्रियान्वयनाय बद्धपरिकरास्ति-

**बहुभाषितायाः प्रोत्साहनाय त्रिभाषानियमस्य यथाशीघ्रं क्रियान्वयनम्। सहैव यथासंभवं मातृभाषा/स्थानीयभाषायाः शिक्षणम्, अधिकानुभवाधारितभाषाशिक्षणम्..................**

**पाठ्यचर्या, मानवीयमौल्यम्, विज्ञानम्, कला, हस्तकला, क्रीडा इत्यादिषु भारतस्य पारम्परिकज्ञानस्य समावेशः ।**[6]

भारतीयभाषाणां शिक्षणेषु **संस्कृतभाषाशिक्षणस्य** विषयेऽपि राष्ट्रियशिक्षानीतौ प्रावधानानि सन्ति-

**संस्कृतभाषायाः महत्वपूर्णयोगदानम्, विभिन्नविधानानां विषयाणां साहित्यम्, सांस्कृतिकमहत्त्वम्, भाषायाः अस्याः वैज्ञानिकप्रकृतिं च वीक्ष्य संस्कृतं न केवलं संस्कृतपाठशालास्तरे विश्वविद्यालयस्तरे एव सीमितं न कृत्वा मुख्यधारां प्रति समानीयते । विद्यालयेषु त्रिभाषीनियमानुसारं वैकल्पिकरूपेण पुनश्च उच्चशिक्षायामपि उच्चपाठ्यक्रमरूपेण इयं भाषा समानीयते । इयं पृथक्तया न पाठ्यते किन्तु रुचिपूर्णविषयरूपेण, नवाचारविधिना अन्य समसामयिकप्रासंगिकविषयेषु यथाम्तणगि-, खगोलशास्त्रम्, दर्शनशास्त्रम्, नाटकप्रभेदाः, इत्यादिषु समायोजनं भविष्यति । अतः अस्याः नीतेः अवशिष्टभागस्य संगततां सम्पाद्य संस्कृतविश्वविद्यालयाः अपि उच्चशिक्षायाः श्रेष्ठबहुविषयकसंस्थारूपेण परिवर्तनदिशि अग्रेसरेयुः । तेषां संस्कृतविभागाः संस्कृते तथा संस्कृतज्ञानव्यवस्थायां शिक्षणं तथा अन्तर्विषयकानुसन्धानादीनां संचालनं कुर्वन्तः सन्ति तान् सर्वान् पूर्णरूपेणनूतनबहुविषयकोच्चशिक्षाव्यवस्थायां संस्थाप्य सुदृढञ्च करिष्यते । छात्राणाम् अपेक्षा यदि स्यात् तदा संस्कृतम् उच्चशिक्षायाः स्वाभाविकम् अङ्गं भविष्यति ।**[7]

अत्र स्पष्टमस्ति यत् संस्कृतभाषा मुख्यधारां प्रति आगच्छेत् । छात्राणां मुखात् निःस्सरेत् इति अस्याः नीतेः लक्ष्यं वर्तते । संस्कृतसंभाषणं, संस्कृते नवाचाराः, संस्कृते नूतनविषयान् अधिकृत्य शोधकार्यं, समसामायिकविषयेषु संस्कृतस्य प्रासंगिकता इत्यादिनि लक्ष्यानि स्वीकृत्य राष्ट्रियशिक्षानीतिः 2020 अग्रेसरति ।

राष्ट्रियशिक्षानीतेः केचन प्रमुखसिद्धान्ता अपि वर्तन्ते ।[8] तेषु-

- **नैतिकता, मानवीयमौल्यानि, संविधानिकमौल्यानि च** यथा कारुण्यम्, अन्यं प्रति सम्मानः, स्वच्छता, सदाचारः, लोकतान्त्रिकभावना, सेवाभवना, सार्वजनिकसम्पत्तिं प्रति सम्मानम्, वैज्ञानिकचिन्तनम्, स्वतन्त्रता, उत्तरदायित्वम्, बहुत्ववादः, समनता, न्यायः च ।
- **बहुभाषितायाः कृते प्रोत्साहनम्,** अध्ययनाध्यपनकार्येषु भाषाशक्तेः प्रोत्साहनम् ।
- **जीवनकौशलम्** - यथा परस्परसंवादः, सहयोगः, सामूहिककार्यम्, स्थितिस्थारकता च ।
- **उन्नतस्तरस्य शोधः** गुणात्मकशिक्षायाः कृते तद्विकासार्थं च ।

- **मम मूलं भारतम् इति अभिमानः**, अपि च अस्य देशस्य उन्नत वैविध्यमय - आधुनिक - प्राचीनसंस्कृत्या, ज्ञानप्रणाल्या, परम्परया च प्रेरणाप्राप्तिः ।

निश्चयेन एते सर्वे सिद्धान्ता: संस्कृतभाषाशिक्षणे एवं साहित्यशिक्षणे एव सम्मिलिता: सन्ति । अत: राष्ट्रियशिक्षानीतौ संस्कृतशिक्षणस्य विशिष्टं स्थानम् ।

**राष्ट्रियशिक्षानीतिमनुसृत्य संस्कृतशिक्षणस्य परिपेक्ष्ये शिक्षकस्य भूमिका**

राष्ट्रस्य भविष्यनिर्मातार:शिक्षका एव इत्यस्मिन् विषये काचित् शङ्का न विद्यते । अथर्ववेदे उक्तम्-

**आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथ्वीं दिवं च ।**
**ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवा: सम्मनसो भवन्ति ।।**[९]

अर्थात् आचार्य एव पृथिवीत: द्युलोकपर्यन्तं सर्वविषयाणां ज्ञानं शिष्याय प्रयच्छति । स: सर्वा सृष्टि: स्वशिष्याय सृजति इति प्रतिभाति । ब्रह्मचारी तपसा तान् रक्षति,अत: सर्वे देवा: तस्मिन् ब्रह्मचारिणि निवसन्ति ।

संस्कृतशिक्षक: संस्कृतरथस्य रथी । स एव संस्कृतमातु: मंदिरस्य शिल्पी । छात्राणां मनस्सु संस्कृतं प्रति रुच्युत्पादका:, संस्कृतज्ञानविज्ञानदर्शका:, संस्कृतस्य भविष्यनिर्मातार: संस्कृतशिक्षका एव । वस्तुत: संस्कृतं शिक्षकाधीना भाषा, न तु सर्वकाराधीना ।

यदि संस्कृतशिक्षका: संस्कृतसंभाषणशीला:, उत्साहिन:, संस्कृतनिष्ठा:, नवाचारशीला:, सक्रिया: भविष्यन्ति तर्हि अवश्यमेव शिक्षणसंस्थासु संस्कृतं नित्यं वर्धिष्यति । शिक्षा सदैव न केवलं ज्ञानदायिनी अपि तु आनन्दप्रदायिनी अपि भवेत् । अत: संस्कृतशिक्षणे नवाचारस्य पालनम् आवश्यकम् ।

राष्ट्रियशिक्षानीत्यानुसारेण भाषाधिगमनाय छात्राणां चतुर्णां कौशलानां वर्धनम् आवश्यकमेव ।




चत्वारि कौशलानि क्रमेण एव प्राप्तव्यानि । एतेषां चतुर्णां समानं महत्त्वमस्ति । अत: संस्कृतशिक्षक: एतेषां भाषाकौशलानां कथम् अभ्यासं कारणीयम् इत्यस्मिन् विषये पारंगत: भवेत् ।

**अधिगमपद्धतय:**

1. **श्रवणम्-** संस्कृतशिक्षणस्य प्रथमं सोपानं विद्यार्थिषु श्रवणेच्छाया: जागरणमस्ति । विद्यार्थिषु श्रवणकुतूहलस्य निर्माणाय श्राव्यमाना: विषया: रुचिकरा: भवेयु: । यथा-कथा:, अभिनयगीतानि, नीतिश्लोका: इत्यादय: । विषयनिरूपणशैल्यापि सरसा भवेत् । छात्राणां ज्ञानस्तरमवलम्ब्य पाठनीयम् । शिक्षकस्य ध्वनि: श्रवणीया, आरोह-अवरोहेण युक्ता भवेत् । एकाग्रचित्ततया भाषाश्रवणस्य अभ्यास: अपि कारणीय: ।

क्रीडामाध्यमेनापि श्रवणाभ्यास: भवितुं शक्यते । यथा-

शिवाजी वदति-गच्छतु
शिवाजी वदति-आगच्छतु
अत्र शिक्षक; यां आज्ञां वदति, छात्रा: तस्या: अनुपालनं कुर्वन्ति । अत: आज्ञा श्रोतव्या इति आवश्यकम् ।

श्रवणकौशलवर्धनाय उक्तलेखनमपि एका विशिष्टा प्राचीना पद्धति: । अत: शिक्षक: श्रुतस्य लेखनस्य अभ्यास: कारयेत् ।

डिजिटल माध्यमेनापि श्रवणकौशलस्य अभ्यास: संभवति । सप्ताहे एकवारं शिक्षक: दूरदर्शने प्रसार्यमाणा संस्कृतवार्तावली कार्यक्रम:, Animated संस्कृतबालगीतानि, संस्कृतचलचित्राणि इत्यादय: कार्यक्रमा: छात्रेभ्य: दर्शयेत् तथा च तेषाम् अर्थावबोध: अपि कारयेत् । राष्ट्रियशिक्षानीतौ सद्यस्क(डिजिटल)शिक्षाया: प्रावधानानि अपि सन्ति एव ।[10]

श्रवणकौशलवर्धनाय एता: पद्धतय: न केवलं विद्यालयेषु अपि तु उच्चशिक्षासंस्थानेष्वपि प्रयोगयोग्या: ।

**2. भाषणम् -** संस्कृतशिक्षणस्य द्वितीयं किन्तु सर्वाधिकं महत्त्वपूर्णं सोपानं संभाषणमेव । संस्कृतस्य अवनते: मूलकारणं संस्कृतस्य अन्यभाषामाध्यमेन पाठनमस्ति । संस्कृतस्य रक्षणाय संस्कृतं संस्कृतभाषामाध्यमेन एव पाठनीयम्, परीक्षामपि तद्भाषा माध्यमेन एव भवेत् । अत: संस्कृतशिक्षका: संस्कृतस्य संस्कृतमाध्यमेन एव पाठनं कुर्यु: । भाषणकौशल-विकासाय संभाषणमेव उपायम् । प्रथमम् अभिनयमाध्यमेन सरलविधिना प्रत्यक्षपाठनपद्धत्या, कथाकथनेन, भाषाक्रीडया, चित्रप्रदर्शनेन, वस्तुप्रदर्शन्या तथा च एतादृशीभि: अन्याभि: विधिभि: संभाषणं पाठनीयम् । अनतरं एषैव पद्धति: पाठ्यक्रमस्य पाठनेपि प्रयोक्तव्या । न केवलं कक्षायां अपि तु कक्षासमयं विहाय आपि शिक्षकच्छात्रसंवादा: संस्कृतेन भवेयु: । कक्षायां दैनन्दिनवाक्यानाम् अभ्यासमपि भवेत्, येषां प्रयोग:

छात्राः गृहेऽपि कर्तुं शक्नुवन्ति। पाठ्येतर गतिविधयः (यथा विविधाः प्रतियोगिताः, प्रार्थनासभादि) संस्कृतभाषायामपि भवेयुः । संस्कृतशिक्षकः नूतनानाम् आधुनिकशब्दानां परिचयोऽपि कारयेत् । किन्तु शिक्षकः एकैकमपि अभ्यासं स्वयं पठित्वा आत्मसातकृत्य एव पाठयेत् इत्यावश्यकम्।

भाषणकौशलवर्धनाय एते सर्वे प्रयोगाः उच्चशिक्षासंस्थानेष्वपि भवितुं शक्यन्ते।

**3. पठनम्-** वाक्यानां सुष्ठूच्चारणं तेषाम् अर्थावगतिः एव पठनक्रिया । प्राचीनकाले वेदाध्ययनाय गुरूमुखोच्चारणानूच्चारण विधिः आसीत्। वेदार्थस्य ज्ञानेन साकं वेदमन्त्राणाम् उच्चारणगतदोषानां परिहारस्यापि आवश्यकता आसीत् तत्र। अतः वेदाङ्गेषु

शिक्षावेदाङ्गस्य महत्त्वमन्यतमम्। शिक्षाग्रन्थेषु उत्तमवाचकस्य गुणाः दोषाश्च वर्णिताः सन्ति।

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।।**
**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः ।।**[11]

वर्णोच्चारणे शब्दोच्चारणे वा दोषः न भवेत् अन्यथा का हानिः स्यात् इत्यपि दृष्टान्तेन शिक्षाग्रन्थेषु वर्णितमस्ति।

**मन्त्रो हीनः स्वरतो वर्णतो वा**
**मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[12]

अतः पाठनशुद्धता आवश्यकी इति स्पष्टमेव । गुरूमुखोच्चारणानूच्चारण विधेः परिवर्तितं स्वरूपमेव आदर्शवाचनम्, अनुकरणवाचनं, मौनवाचनादिनि वाचनानि।

आदर्शवाचनं शिक्षकः स्वयमेव कुर्यात् । शिक्षकः सर्वेषां शब्दानां स्वयं सुस्पष्टमुच्चारणं कुर्यात्। शब्दानां सम्यक् गतिना सावधानतया उच्चारणं भवेत्। आदर्शवाचने भावपूर्णं वाचनं भवेत् इत्यपि महत्त्वपूर्णम्।

अनुकरणवाचनं छात्राः कुर्युः । प्रप्रथमं युगपदनुवाचनम् अनन्तरं एकैकस्य छात्रस्य मुखात् कानिचन वाक्यानि निर्गच्छेयुः। पठनकौशलवर्धनाय शिक्षकेण सम्यक् योजना क्रियते। आरम्भदिनेषु उच्चैः वाचनं कारणीयम्। अनन्तरं मौनवाचनस्यापि अभ्यासः भवेत्। पठनकौशलस्य वर्धनं पठनादेव

भवति, अत: संस्कृतशिक्षक: स्वयमेव संस्कृतग्रन्थान् पठेत् । छात्रा: अपि पठेयु: । अत:ग्रंथालयस्य उपयोगाय छात्राणां कृते समय: कल्पनीय: । ग्रन्थालये अधिकानि संस्कृतपुस्तकानि, संस्कृतपत्रिकाश्च भवेयु: ।

उच्चशिक्षासंस्थानेष्वपि पठनकौशलविषये एते उपाया: प्रयोक्तव्या: । केवलं तत्र स्तरस्य भिन्नता भविष्यति ।

**4. लेखनम्-** भाषालेखनं भाषाकौशलवर्धनाय अन्तिमं सोपानम् । संस्कृतलेखनाय देवनागरी लिप्या: आवश्यकता । अत: शिक्षकै: लिपिशिक्षणविषये उपेक्षा न कर्तव्या । प्रारम्भे लघुवाक्यानां लेखनस्य अभ्यासः करणीयः । तत्पश्चात् स्तरानुगुणं पत्रलेखनं, दैनंदिनीलेखनं, पत्रिकासु संस्कृतलेखानां प्रकाशनं इत्यादिषु कार्येषु छात्रा: संलग्ना: भवेयु: इति शिक्षकस्य दायित्वम् ।

उच्चशिक्षणसंस्थानेषु काव्यलेखनादि अभ्यास: अपि भवेत् । अत: एतदर्थं प्राध्यापका: कार्यशाला, परियोजना कार्यं इत्यादिषु विषयेषु चिन्तयेयु: ।

इत्थं स्पष्टं यत् छात्राणां भाषाविकासत: तान् शास्त्रपर्यन्तं नेतुं शिक्षकस्य भूमिका एव अग्रगण्यास्ति ।

**संस्कृते शोधकार्यम्-** संस्कृतं प्राचीना भाषा अस्ति किन्तु अस्यां भाषायां निहितं ज्ञानम् आधुनिकपरिप्रेक्ष्ये अपि प्रासङ्गिकमेव अत: छात्रा: आधुनिकसन्दर्भे संस्कृतस्य उपयोगिता विषये शोधकार्यं कुर्यु: इति प्राध्यापकस्य दायित्वम् । यथा-संस्कृतग्रन्थेषु मनोसामाजिक चिन्तनम्, संस्कृतकथासाहित्यस्य व्यावहारिक प्रयोग:, सूक्तिनां सामाजिक-प्रभाव: इत्यादय: अनेके विषया:सन्ति यत्र शोधस्य आवश्यकता वर्तते । शिक्षका: संस्कृते विज्ञानाधारिता:, संस्कृते आधुनिककाव्यविधा: स्वीकृता:, संगणकदृष्ट्या संस्कृतशोधादि विषये विविधा: परियोजना: स्वीकर्तुं शक्नुवन्ति यस्य लाभ: समाजाय भविष्यति ।

**निष्कर्ष: -** शिक्षणं शिक्षकाधीनम् अत: राष्ट्रियशिक्षा नीते: साफल्यमपि शिक्षकस्य हस्ते एव विद्यते । शिक्षकस्य महत्वं तत्रापि लिखितमस्ति-

**वास्तवरूपेण शिक्षकाः एव बालकानां भविष्यं निरूपयन्ति । अतः ते अस्माकं राष्ट्रस्य भविष्यमपि निर्मान्ति । अतः एतेषाम् उदात्तयोगदानस्य कारणेनैव भारतस्य समाजे शिक्षकाः अधिकसम्मानितसदस्याः सन्ति । अतः सर्वोत्तमः विद्वान् एव शिक्षकः भवितुम् अर्हति । विद्यार्थिनां कृते ज्ञानस्य कौशल्यस्य नैतिकमौल्यस्य च सर्वोत्तमतया संक्रमणार्थं समाजः शिक्षकाणां कृते गुरूणां कृते अपेक्षितानि सर्वाणि संसाधनानि प्रददाति । .......................... शिक्षणव्यवसाये उत्तमजनानां प्रवेशार्थं प्रेरयितुं शिक्षकाणां कृते सम्मानादरभावं पुनरुज्जीवयेत् । अस्माकं बालकानां देशस्य च कृते उत्तमभविष्यं**

**विनिश्चेतुं शिक्षकाणां कृते प्रेरणा सबलीकरणं च अपेक्षितम् अस्ति।**[13]

राष्ट्रियशिक्षानीतिमनुसृत्य संस्कृतशिक्षणाय शिक्षणप्रक्रिया स्वतन्त्रा भवेत् । नवाचारं स्वीकृत्य शिक्षकाः पाठयेयुः । ते प्राचीनज्ञानस्य तथा च आधुनिकसमाजस्य समन्वयकाः भवेयुः । पुरातना पद्धतिः नूतनया सह मिलित्वा अग्रेसरेत् । संस्कृतं समाजस्य भाषा भवेत् । एतदेव लक्ष्यं स्वीकृत्य संस्कृतशिक्षकाः अग्रे गच्छेयुः । तेषां प्रशिक्षणमपि आवश्यकं वर्तते । यस्मिन् विषये राष्ट्रियशिक्षानीतौ प्रावधानानि सन्ति ।

**शिक्षकेभ्यः उच्चगुणवत्तायाः सामग्रया सह शिक्षणशास्त्रे प्रशिक्षणस्यापि आवश्यकता भविष्यति । अध्यापकशिक्षायाः अपि शनैः शनैः 2030 वर्षं यावत् वहुविषयकविद्यालयेषु विश्वविद्यालयेषु च अन्तर्भावः क्रियते । यथा यथा सर्वे महाविद्यालयाः विश्वविद्यालयाश्च बहुविषयकाः भविष्यन्ति तथा तेषाम् लक्ष्यम् उत्कृष्टशिक्षाविभागस्य स्थापना । यत्र शिक्षायाम् शिक्षाशास्त्रम् (बीएड्), शिक्षाचार्यः (एमएड्), विद्यावारिधिः (पीएचडी) इत्येतेषाम् उपाधिप्रदानं भविष्यति ।**[14]

संस्कृतशिक्षकाणां कृतेऽपि प्रशिक्षणस्य विशेषा योजना वर्तते तत्र-

**शिक्षाशास्त्रे संस्कृतविषये च वर्षचतुष्टयस्य बहुविषयकेण शिक्षाशास्त्रोपाधिना (बी.एड्. डिग्री) विनियोगमाध्यमेन (मिशन् मोड्) संपूर्णस्यास्य देशस्य संस्कृतशिक्षकेभ्यः व्यवसायिकशिक्षा प्रदास्यते ।**[15]

इत्थं स्पष्टमस्ति यत् सुरभारत्याः संरक्षकाः, आश्रयभूताः, सम्प्रेरकाः, संस्कृतयुगनिर्मातारः संस्कृतशिक्षका एव । तेषां परिश्रमेण, स्नेहेन, नवाचारेण, विनयेन, विवेकधनेनैव संस्कृतभाषायाः पुनरुज्जीवनं भविष्यति ।

**सन्दर्भ**

1. ऋग्वेद. 10.125.5

2. वाक्यपदीय/ब्रह्मकाण्डम्/124

3. वाक्यपदीय/ब्रह्मकाण्डम्/125

4. काव्यादर्श-1/4

5. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)22.4

6. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)22.8

7. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)22.15

8. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्) परिचय

9. अथर्ववेद. 11.5.8

10. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)भाग-3/24

11. पाणिनीय शिक्षा/32-33

12. पाणिनीय शिक्षा/52

13. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)5.1

14. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)5.22

15. राष्ट्रियशिक्षानीतिः 2020(संस्कृतम्)22.15

## सन्दर्भ ग्रन्थ सूची

1. भाष्यकार- सातवलेकर श्रीपाद दामोदर, अथर्ववेदभाष्यम्, मानव उत्थान सङ्कल्प संस्थान, नईदिल्ली, ई. सन् 2010, संवत् 2067

2. भाष्यकार- सातवलेकर श्रीपाद दामोदर, ऋग्वेदभाष्यम्, मानव उत्थान सङ्कल्प संस्थान, नईदिल्ली, ई. सन् 2010, संवत् 2067

3. आचार्य दण्डी, व्याख्याकार- मिश्र आचार्य रामचन्द्र, काव्यादर्श, चौखम्बा विद्याभवन, वाराणसी, ई. सन् 1958, संवत् 2015

4. महर्षि पाणिनि, भाष्यकार-अवस्थी बच्चूलाल, पाणिनीयशिक्षा, कालिदास संस्कृत अकादमी, उज्जयिनी, द्वितीय संस्करण, संवत् 2075

5. राष्ट्रियशिक्षानीतिः2020(संस्कृतम्) https://www.education.gov.in/sites/upload_files/mhrd/files/nep/2020/sanskrit.pdf

6. भर्तृहरिः, व्याख्याकार- त्रिपाठी डॉ. रामकिशोर, वाक्यपदीयम्(ब्रह्मकाण्डम्),भारतीय विद्या संस्थान,वाराणसी, प्रथम संस्करण ई. सन् 1997